शशिना च निशा निशया च शशी। शशिना निशया च विभाति नभः। पयसा कमलं कमलेन पयः। पयसा कमलेन विभाति सरः। शशिना। शशिना इति उक्ते चन्द्रेण। चन्द्रद्वारा। च निशा। निशा इति उक्ते रात्रिः। नक्तम्। अर्थात् शशिना निशा विभाति चन्द्रेण रात्रिः विभाति। चन्द्रेण रात्रिः शोभते। विभाति इति उक्ते शोभते। चन्द्रेण रात्रिः शोभते। चन्द्रद्वारा रात्रेः निशायाः शोभा भवति। निशया च शशी। रात्र्या रात्रिद्वारा च शशी चन्द्रः शोभते विभाति। अर्थात् रात्रिद्वारा चन्द्रस्य शोभा भवति। चन्द्रः शोभते।

शशिना निशया च विभाति नभः। नभः आकाशम्। विभाति शोभते। शशिना निशया च अर्थात् शशिद्वारा निशाद्वारा च नभः विभाति अर्थात् चन्द्रेण रात्र्या च। उभाभ्यां निशा-शशीभ्यां च नभः विभाति। नभः आकाशं शोभते। चन्द्रेण रात्रिः शोभते रात्र्या च चन्द्रः शोभते किन्तु उभाभ्यां चन्द्र-रात्रिभ्याम् आकाशं शोभते आकाशं विभाति इति अर्थः।

तथैव पयसा कमलं। पयस् जलम् इति अर्थः। पयसा जलेन। कमलं पुष्पम्। कमलं किं भवति, कमलं पद्म-पुष्पं पद्मम्। पयसा कमलं विभाति। जलेन पद्मं विभाति। पद्मपुष्पं विभाति शोभते। कमलेन पयः। कमलेन पद्मेन पयः जलम् अपि विभाति इति उक्ते शोभते अर्थात् पयसा कमलं शोभते कमलेन पयः शोभते। जलेन पद्मं शोभते पद्मेन च पयः जलं शोभते। अर्थात् जलेन कमलपुष्पस्य पद्मपुष्पस्य शोभा वर्धते। तथा पद्मेन जलस्य शोभा वर्ध ते इति अर्थः।

किन्तु पयसा कमलेन विभाति सरः। सरः इति उक्ते सरस्। ह्रदः सरोवरः पुष्करिणी इति अर्थः। पयसा कमलेन विभाति सरः। सरोवरः कथं विभाति अथवा केन विभाति पयसा विभाति कमलेन च विभाति अर्थात् उभाभ्यां पयःकमलाभ्यां च सरः विभाति सरोवरः शोभते।

पुनर् एकवारं संपूर्णं सुभाषितं कथयामि। चन्द्रेण रात्रिः शोभते रात्र्या च चन्द्रः शोभते। चन्द्र-रात्रिभ्यां च नभः इति उक्ते आकाशं शोभते। तथैव जलेन पद्मं शोभते पद्मेन च जलं शोभते। तथैव जल-कमलाभ्यां च सरः सरोवरः अर्थात् ह्रदः शोभते इति अर्थः।